**काशीखण्ड** न० काशीमाहात्म्यप्रतिपादकं खण्डम् । स्कन्दपुराणान्तर्गते काशीमाहात्म्यादिप्रतिपादके व्यासप्रणीते खण्डभेदे तत्प्रतिपाद्यविषयाश्च तत्रानुक्रमणिकाध्याये दर्शिता यथा

“विन्ध्यनारदसंवादः प्रथमं परिकीर्त्तितः । सत्यलोकप्रभावश्च द्वितीयः समुदाहृतः । अगस्त्याश्रमपदे देवानामागमस्ततः । पतिव्रताचरित्रं च प्रस्थानं कुम्भसम्भवः । तीर्थप्रशंसा च ततः सप्तपूर्य्यस्ततः स्मृताः । संयमिन्याः स्वरूपञ्च ब्रह्मलोकस्ततः परम् । इन्द्राग्न्योर्लोकसंप्राप्तिस्ततश्च शिवशर्म्मणः । अग्नेः समुद्भवस्तस्मात् क्रव्यादवरुणसम्भवः । गन्धवत्यलकापुर्य्यौरीशयोस्तु समुद्भवः । चन्द्रलोकपरिप्राप्तिः शिवशर्म्मद्विजन्मनः । उडुलोककथा तस्मात्ततः शुक्रसमुद्भवः । महेशगुरुशौरीणां लोकानां वर्णनं ततः । सप्तर्षीणां ततोलोका ध्रुवस्य च तनस्तपः । ततोध्रुवपदप्राप्तिर्ध्रुवलोकस्थितिस्ततः । दर्शनं सत्यलोकस्य तस्य वै शिवशर्म्मणः । चतुर्भुजाभिषेकश्च निर्व्वाणं शिवशर्म्मणः । स्कन्धागस्त्योश्च संवादो मणिकर्ण्याः समुद्भवः । ततस्तु गङ्गामाहात्म्यं ततोदशहरास्तवः । प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् । वाराणस्याः प्रशंसा च भैरवाविर्भवस्ततः । दण्डपाणेः समुद्भूतिर्ज्ञानवाप्युद्भवस्ततः । आख्यानञ्च कलावत्याः सदाचारस्ततः परम् । ब्रह्मचारिप्रकरणं ततः स्त्रीलक्षणानि च । कृत्याकृत्यप्रकरणमविमुक्तेशवर्णनम् । ततोगृहस्थधर्म्माश्च ततोयोगनिरूपणम् । कालज्ञानं ततः प्रोक्तं दिवोदासस्य वर्णनम् । काशाश्च वर्णनं तस्माद्योगिनीवर्णनं ततः । लोलार्कस्य समाख्यानमुत्तरार्ककथा ततः । शाम्बादित्यस्य महिमा द्रुपदादित्यशंसनम् । ततस्तु गरुडाख्यानमरुणार्कोदयःस्ततः । दशाश्वमेधिकं तीर्थं मन्दराच्च गणागमः । पिशाचमोचनाख्यानं गणेशप्रेषणं ततः । माया गणपतेश्चाथ दुण्टिप्रादुर्भवस्ततः । विष्णुमायाप्रपञ्चोऽथ दिवोदासविसर्ज्जनम् । ततः पञ्चनदोत्पत्तिर्विन्दुमाधवसम्भवः । ततोवैष्णवतीर्थानां माहात्म्यपरिवर्णनम् । प्रयाणं मन्दरात्काश्यां वृषभध्वजशूलिनः । जैगीषव्येण संवादो ज्येष्ठस्थाने महेशितुः । ततः क्षेत्ररहस्यस्य कथनं पापनाशनम् । अथातः कन्दुकेशस्य व्याघ्रेशस्य समुद्भवः । ततः शैलेश्वरकथा रत्नेशस्य च दर्शनम् । कृत्तिवासःसमुत्पत्तिस्ततश्चायतनागमः । देवतानामधिष्ठानं दुर्गासुरपराक्रमः । दुर्गाया विजयश्चाथ तत ओङ्कारवर्णनम् । पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः । त्रिलोचनप्रभावोऽथ केदाराख्यानमेव च । ततो धर्म्मेशमहिमा ततः पक्षिकथा शुभाः । ततो विश्वभुजाख्यानं दुर्द्दमस्य कथा ततः । ततोवीरेश्वराख्यानं वीरेशमहिमा पुनः । गङ्गा तीर्थैश्च संयुक्ता कामेशमहिमा ततः । विश्वकर्म्मेशमहिमा दक्षयज्ञसमुद्भवः । सत्या देहविसर्गश्च ततोदक्षेश्वरोद्भवः । ततो वै पार्व्वतीशस्य महिम्नः परिकीर्त्तनम् । गङ्गेशस्याथ महिमा नर्मदेशसमुद्भवः । सतीश्वरसमुत्पत्तिरमृतेशादिवर्णनम् । व्यासस्य हि भुजस्तम्भो व्यासशापविमोक्षणम् । क्षेत्रतीर्थकदम्बं च मुक्तिमण्डपसङ्कथा । विश्वेशाविर्भवश्चाथ ततोयात्रपरिक्रमः । एतदाख्यानशतकं क्रमेण परिकीर्त्तितम्” ।

**काशीनाथ** पु० ६ त० । महादेवे काशीपत्यादयोऽप्यत्र” कालं निकटतो ज्ञात्वा काशीनाथं समाश्रयेत्” । काशीनाथं समाश्रित्य कुतःकालभयं नृणाम्” काशीख० ।

**काशीयात्रा** स्त्री०७त०; काशीस्थतीर्थेषु यात्रायाम् तत्प्रकारः काशीख० दर्शितोयथा ।

“श्रीवेदव्यास उवाच । निशामय महाप्राज्ञ ! लोमहर्षण ! वच्मि ते । यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा । सचेलमादौ संस्नाय चक्रपुष्करिणीजले । संतर्प्य देवान् सपितॄन् ब्राह्मणांश्च तथार्थिनः । आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् । नमस्कृत्य ततोगच्छेद्द्रष्टुं ढुण्ढिविनायकम् । ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् । तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः । ततः पुनर्दण्डपाणिरित्येषा पञ्चतीर्थिका । दैनन्दिनी विधातव्या महाफलमभीप्सुभिः । ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धिदा । द्विसप्तायतनानाञ्च१४कार्य्या यात्रा प्रयत्नतः । कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि । अथ वा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः । तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः । मौनेन यात्रां कुर्वाणः फलं प्राप्नोति यात्रिकः । ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः । त्रिविष्टपं महादेवं ततोवै कृत्तिवाससम् । रत्नेशं चाथ चन्द्रेशं केदारं च ततोव्रजेत् । धर्म्मेश्वरं च वीरेशं गच्छेत् कामेश्वरं ततः । विश्वकर्म्मेश्वरं चाथ मणिकर्णीश्वरं ततः । अविमुक्तेश्वरं दृष्ट्वा ततोविश्वेशमर्च्चयेत् । एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिना । यस्तु क्षेत्रमुषित्वा तु नैतां यात्रां समाचरेत् । विघ्नास्तस्योपतिष्ठन्ते क्षेत्रोच्चाटनसूचकाः । अष्टायतनया-